This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्र॰ चं॰ ना॰
१

श्रीगणेशायनमः श्रीरव्येनमः श्रीगुरवेनमः श्रीलक्ष्मीनरसिंहायनमः मध्यान्हार्कमरीचिकास्विवपयःप्
रोयरत्तानतः खंवायुर्ज्वलनोजलंक्षितिरितित्रैलोक्यमुन्मीलति यत्तत्वंविदुषांनिमीलतिपुनःस्रग्भो
गिनाभोगोपमं सांद्रानंदमुपास्महेतरमलंस्वात्मावबोधंमहः १ अपिच अन्तर्नाडीनियमितमरुल्लंघि
तब्रह्मरंध्रं स्वांतेशांतिप्रणयिनिसमुन्मीलदानंदसांद्रम् प्रत्यग्ज्योतिर्जयतियमिनःस्पष्टलालाटनेत्रव्या
जव्यक्तीकृतमिवजगद्व्यापिचंद्रार्द्धमौलेः २ नांद्यंतेसूत्रधारः अलमतिविस्तरेण आदिष्टोस्मिस
कलसामंतचक्रचूडामणिमरीचिनीराजितचरणकमलेन बलवदरिनिवहवक्षस्तटकपाटपाटन
प्रकटितनरसिंहरूपेण प्रबलतरनरपतिकुलप्रलयमहार्णवमग्नमेदिनीसमुद्धरणमहावराहे
ण निखिलदिग्विलासिनीकर्णपूरीकृतकीर्तिलतापल्लवेन समस्ताशास्तेरमकर्णतालक
स्फालनबहलपवनसंपातनर्त्तितप्रतापानलेन श्रीमतागोपालेन यस्याखिलस्यसहजसुहृदो
राज्ञः श्रीकीर्तिवर्मदेवस्यदिग्विजयव्यापारांतरितपरब्रह्मानंदैरस्माभिःसमुन्मीलितविविधवि
षयरसस्पर्शदूषिताइवातिवाहितादिवसाः इदानींतुकृतकृत्यावयं यतः नीताःक्षयंक्षितिभुजो
राम
१

Acc. NO. ~~1448~~ M-1510
Title - प्रबोधचन्द्रोदय.
Author - कृष्णमिश्र.
Sub ~~Date~~ - Drāma.
~~Subject~~ -
Date - ३
folio - 5
Xerox - 8

KKSU LIBRARY RAMTEK 441 106 M-1510 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृपतेर्विपक्षारण्यावतीर्णस्तिरस्कृत्यितेत्रमात्यैः साम्राज्यमर्थ्यौक्षितिपालमौलिमालार्चितं भुवि पयो विहितं १

निधिमेखलायां ३ तदद्य शांतरसप्रायप्रयोगाभिनयेनात्मानं विनोदयितुमिच्छामः तदस्मिन्नेवतत्र मनव

र्द्धिः स्वस्त्रमिश्रैः प्रबोधचंद्रोदयं नाम नाटकं निर्माय भवतः समर्पितमासीत् तदस्य तः श्रीकीर्तिवर्म

णः पुरस्तादभिनेतव्यं भवता अस्ति चास्य नृपतेः सपरिषदस्तदवलोकनं कुतूहलमिति तद्भवतु गृहं ग

त्वा गृहिणीं समाहूय संगीतकमनुतिष्ठामि परिक्रम्य नेपथ्याभिमुखमवलोक्य आर्ये इतस्तावत् प्र

विश्य नटी एसह्मि आणवेदु अज्जउत्तो को णिओओ अणुचिट्ठिअदुत्ति सूत्रधारः आर्ये विदितमे

वभवत्या अस्ति प्रत्यर्थिपृथ्वीपति विपुलबलारण्यसमूहोत्तापज्योतिर्ज्वालावलीरत्नत्रिभुवन

विवरो विश्वविश्रांतकीर्त्तिः गोपालो भूमिपालान्प्रसभमसिलतामित्रमात्रेण जित्वा साम्राज्ये

कीर्त्तिवर्मा नरपतितिलको येन भूयोन्यषेचि ६ अपिच अघाप्युन्मदयातुधानतरूणीचंचल

रास्फालनव्यावल्गन्नरपालतालरणितैर्नृत्यत्पिशाचांगनाः उद्गायंति यशांसि यस्य विततैर्नो

दैः प्रचंडानिलप्रक्षुभ्यत्करिकुंभकूटकुहरव्यक्तैरणक्षोणयः ५ तेनच शांतपथप्रस्थितेना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मविनोदार्थप्रबोधचंद्रोदयाभिधानंनाटकमभिनेतुमादिष्टोस्मि तदादिश्यंतां भरताः वर्तिकापरिग्रहणा
य नटी सविस्मयं अज्जउत्त अच्चरिअं २ जेण तपाणिअमुअबलविक्कमेक्कणिम्मखिरसअलरा
अमंडलेण आअणाअट्ठिअकढिणकोअंडदंडवरिसंतसरणिअरजज्जरिज्जंततुरंगतरंगमालं णि
रंतरणिवडंतितिखविखिवत्तसहस्सपल्लहुत्तुंगमाअंगमहामहिहरसहस्संमम्मंतमुअदंड
चंडमंदराभिघादघुम्मंतसअलपत्तिसलिलसंघादं कणसेणसाअरं णिम्महिअमहुमहणेणअस्सी
समुद्दंद्दि रसीअरं आसादिदासमरविजअलच्छी तस्स संपदं सअलमुणिअणसओहिणिज्जवीरचरिदस्स लीद्दि
कुधमेरिसो उवसमो संवुत्तो सूत्रधारः आर्ये निसर्गसौम्यमेव ब्राह्मं ज्योतिः कुतोपि कारणात्प्राप्तवि
कारमपि पुनः स्वभावमेवावतिष्ठते यतः सकलभूपालकुलप्रलयकालाग्निरुद्रेण चेदिपतिनास
मुन्मीलितं चंद्रान्वयपार्थिवानां पृथिव्यामाधिपत्यं स्थिरीकर्तुमयमस्य संरंभः पश्यतथा कल्पांत
वातसंक्षोभलंघिताशेषभूभृतः स्थैर्यप्रसादमर्यादास्तीएवहिमहोदधेः ७ अपि च भगवन्ना
रायणांशांशसंभूतास्तं हि तातत्वाविधाः पौरुषभूषणाः पुरुषाः क्षितिमवतीर्य निष्पादितोस्य राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याः पुनः शांतिमेवप्रतिपद्यंते यथापरशुराममेवाकलयतुभवतीतावत् येनत्रिःसप्तकृत्वोन्टपबहलवसामांसमस्ति
ष्कपंकप्राग्भारेऽस्मिन्नरिच्युतरुधिरसरिद्द्वीपपूरेऽभिषेकः यस्यस्त्रीबालवृद्धावधिनिधनविधौनिर्दयोविश्रुतो
सौराजन्योच्चांसकूटक्रथनपटुरटद्घोरधारःकुठारः ८ सोपिस्ववीर्यारवतार्येनारंभेः समुत्खायकुलंन्टपाणां
प्रशांतकोपज्वलनस्तपोभिः श्रीमान्मुनिःशाम्यतिजामदग्न्यः ९ युग्मं तथायमपिकृतकर्त्तव्यः संप्रतिपरमा
मुपशमनिष्ठांप्राप्तः येनच विवेकेनेवनिर्जित्यकर्णमोहमिवोर्जितं श्रीकीर्त्तिवर्मन्टपतेर्बोधस्येवोदयः कृ
तः नेपथ्ये आः पापशैलूषाधमकथमस्मासुजीवत्सुस्वामिनोमहामोहस्यविवेकसकाशात्पराजयमुदाह
रसि इतिश्रुत्वा सूत्रधारः ससंभ्रममविलोक्य आर्ये उत्तुंगपीवरकुचद्वयपीडितांगमालिंगितः पुलकिते
नभुजेनरत्या श्रीमान्जगंतिमदयन्नयनाभिरामः कामोऽयमेतिमदघूर्णितनेत्रपद्मः १२ मद्वचना
स३ द्यायमुपजातक्रोधइवोपलक्ष्यते तदपसरणमेवास्माकमितः श्रेयः इतिनिष्क्रांतौ प्रस्तावना ततः प्रवि
शतियथानिर्दिष्टः कामोरतिश्च कामः सक्रोधं आः पापेतिपठित्वा ननुरेभरताधम प्रभवतिमनसि
विवेकोविदुषामपिशास्त्रसंभवस्तावत् निपतंतिदृष्टिविशिखायावन्नेंदीवराक्षीणां १२ रम्यंहर्म्यतलंन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्र०चं०ना०
६

वाःसुनयनागुञ्जद्द्विरेफालताःप्रोन्मीलन्नवमालिकासुरभयोवाताःसचंद्राःक्षपाः यद्येतानिजयंतिहंतपरि
तःशास्त्राण्यमोघानिमेतद्बोः कीदृगसौविवेकविभवःकीदृक्प्रबोधोदयः २३ रतिः अज्जउत्तगरुओक्खु
महाराअमहामोहस्सपडिवक्खोविवेओत्तितक्केमि कामः प्रियेनुतस्तवेदंस्त्रीस्वभावसुलभंविवेकाद्भय
मुत्पन्नं पश्य २ अपियदिविशिखाःशरासनंवाकुसुममयंससुरासुरंतथापि ममजगदखिलंवरोरु
नाज्ञामिदमतिलंघ्यधर्तिमुहूर्तमेति २४ तथाहि अहल्यायाजारःसुरपतिरभूदात्मतनयांप्रजानाथोऽ
यासीदभजतगुरोरिंदुरबलां इतिप्रायःकोवानपदमपथेकार्यतमयाश्रमोमद्बाणानांकइवभुवनोन्माथवि
धिषु २५ रतिः अज्जउत्त एवंएदं तथाविमहासहायसंपण्णोसंविदिद्धोजरादीजदोस्सजमत्तिअमप्प
मुहाअमच्चामहाबलासुणीअंदि कामः प्रिये यानेतान्यातोविवेकस्यबलवतोयमादीनमात्यान्पश्यसि
तएतेनियतमस्मान्निरन्निमुक्तमात्रात्प्रागेवविघटिष्यंते तथाहि अहिंसाचैवकोपस्य ब्रह्मचर्यादयो
मम लोभस्यपुरतःकोऽमीसत्यास्तेयापरिग्रहाः २६ यमनियमासन [redacted] प्राणायामप्रत्याहारध्या
नधारणासमाधयस्तुनिर्विकारैकचित्तसाध्यत्वादीषत्करसमुन्मूलनाएव अपिच स्त्रियएवामीषां

राम
६

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुसाः तेनैतेऽस्मदोचराएववर्तंते यतः संतुविलोकनभाषणविलासपरिहासकेलिपरिरंभाः स्मरणमपिकामि
नीनामलमिहमनसोविकाराय १७ विशेषतश्चैतेमदमात्सर्यदंभादिभिरस्मत्स्वामिवल्लभैरभियुज्यमानानरप
तिमंत्रिणमधर्ममेवाश्रयिष्यंति रतिः अज्जउत्तसुदंमए तुह्माणंसमदमविवेअपमुहीणंचएक्कंउप्पत्तिठाणंति
कामः आः प्रियेकिमुच्यतेएकमुत्पत्तिस्थानमिति ननुजनकएवास्माकमभिन्नः तथाहि संभूतः प्रथममिह
प्रभुरस्यसंगान्मायायांमनइतिविश्रुतस्तनूजः त्रैलोक्यंसकलमिदंविसृज्य भूयस्तेनाप्यजनितमिदंकुल
द्वयंनः १८ तस्यचप्रवृत्तिनिवृत्तीद्वेधर्मपत्न्यौ तयोःप्रवृत्त्यामुत्पन्नंमहामोहप्रधानंकुलं निवृत्यांचद्विती
यंविवेकप्रधानमिति रतिः अज्जउत्तजइएव्वंताकिंतिभिन्नंतुह्माणंसोअराअंपिपरोप्परंएआरिसंवेरं कामः
प्रिये एकामिषप्रभवमेव [redacted] सहोदराणामुद्धूतंननुजगतिवैरमितिप्रसिद्धं पृथ्वीनिमित्तमभवत्कुरुपां
डवानांतीव्रस्तथाहिभुवनक्षयकृद्विरोधः १९ सर्वमेवैतज्जगदस्मत्पित्रोपार्जितं तत्रास्माभिस्तातवल्ल
भतयासर्वमेवाक्रांतं तेषांतुविरलःप्रचारः तेनैतेपापाः सांप्रतंपितरमस्मांश्चोन्मूलयितुमुद्यताः रतिः
संतंपापं २ अज्जउत्तकिंएदंयावंविद्देसमेत्तकेणतेहिंआरद्धं अहवा अत्थिउवाओकोविएत्थमंतिदो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्र० चं० ना०
८

कामः अस्त्यत्र निगूढं बीजं रतिः अज्जउत्त ताविं एउघाटीअदि कामः स्त्रीस्वभावाद्भवती भीरुरिति न तद्
रूपं पापीयसा मुद्राह्यते रतिः सनयं अज्जउत्त केरिसं तं कामः प्रियेन भेतव्यं २ हताना माधामात्रेमे
तत् अस्ति किले षा किंवदंती अत्रास्माकं कुले कालरात्रिकल्पा विद्या नाम राक्षसी समुत्पत्स्यत इति रतिः
सभयं हद्धी २ कहं अलाणं कुले रक्खसीत्ति वेब्बदि मे हिअअं कामः प्रियेन भेतव्यं २ किंवदंतीमात्रमेत
त् रतिः अघ तारे रक्खसीए विं आद्धं कामः प्रिये अस्ति किल तत्र प्राजापत्या सरस्वती पुंसः संग
समुज्झित तस्य गृहिणि मायेति तेनाप्यसावस्पृष्टापि मनः प्रसूपतनयं लोकान्सरल क्रमात् तस्माद्
वज निष्यते पुनरसो विद्येति कन्या यया तातस्ते च सहोदराश्च जननी सर्वं चैव नश्यं कुलं २० रतिः स
त्रासोत्कंपं अज्जउत्त परित्ताहि २ इति भर्तारमालिंगति कामः स्पर्शसुखमभिनीय स्वगतं स्फुर
द्रोमोद्भेदस्तरलतरताराकुलदृशो भयोत्कंपोत्तुंगस्तनयुगभरासंगसुभगः अधीराक्ष्याः गुंजन्म
णिवलयदोर्वल्लिरचितः परीरंभो मोदं जनयति च संमोहयति च २१ सकाशं दृढं परिष्वज्य प्रिये

राम
८

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननेतव्यं २ अस्मासुजीवत्सुकुतोविघासत्तिः रतिः अघकिंताएरखुलसीएउप्पत्तींतुह्माणंपडिवक्खाएं
सम्मदा कामः वाढंसाखलुविवेकेनोपनिषद्देव्यांप्रबोधचंद्रोदयेणआत्रासमंजनयितव्या तत्रसर्वएतेशम
दमादयः प्रतिपन्नोयोग्याः रतिः अज्जउत्तकहंएदेहिंअप्पाणोविणासकारिणोणविज्जाएउप्पत्तीतेहिं
दुव्विलोदेहिंसल्लाहिज्जदि कामः प्रिये कुलक्षयप्रवर्त्तानांपापकारिणांकुतःप्रत्यवायगणना पश्यप्र
सहजमलिनवक्रभावभाजांभवतिभवःप्रभवात्मनाशहेतुः जलधरपदवीमवाप्यधूमोज्वलननिवा
शमनुप्रयातिनाशं २२ नेपथ्येआः पापदुरात्मन्कथमस्मानेवपापकारिणइत्याक्षिपसिननुरे गुरो
रप्यवलिप्तस्यकार्याकार्यमजानतः उत्पथप्रतिपन्नस्यपरित्यागोविधीयते २३ इतिपौराणिकीं
गाथांपुराणविदउदाहरंति अनेनाचास्माकंजनकेनअहंकारानुवर्त्तिनाजगत्पतिस्तावत्स्थि
तेवबद्धः मोहादिभिश्चसएवयः सुदृढतांनीतः कामः प्रिये विलोक्यते अस्माकंकुलज्यायान्देव्यामसा
सहविवेकइतएवाभिवर्त्तते यएषः रागादिभिःस्वरसत्यारिभिरारतकांतिर्निर्भर्त्स्यमानइवमानधनःदृष्टां
तः मस्यानितांतखलुक्षीणस्तयाशशांकः कांत्येवसांद्रतुहिनांतरितोविभाति २४ तन्नयुक्तमिहास्मा

KKSU LIBRARY
RAMTEK
44I 106
M-1510
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 16:56
,TRANSFERRED=2020/09/23 at 16:58:43
,PAGES=8
,TYPE=STD
,NAME=S0003701
,Book Name=M-1510-PRABODH CHANDRODAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection